LearnCBSE.in

CBSE Class 9 Sanskrit

# प्रतिदर्श

# प्रश्न-पत्रम् -1

## हल सहित

समय : होरात्रयम् ] [ पूर्णाङ्का: 90

## निर्देशा:

**(i)** प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | |
|---|---|---|
| खण्ड: (क) अपठित-अवबोधनम् | – | 10 अङ्का: |
| खण्ड: (ख) रचनात्मकं कार्यम् | – | 15 अङ्का: |
| खण्ड: (ग) अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्का: |
| खण्ड: (घ) पठित-अवबोधनम् | – | 35 अङ्का: |

**(ii)** सर्वे प्रश्ना: अनिवार्या:।

**(iii)** प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

**(iv)** प्रश्न संख्या अवश्यं लेखनीया।

**(v)** उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड : 'क'

### अपठित-अवबोधनम् (10 अङ्का:)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत—**

भारतवर्ष: अस्माकं देश: अस्ति। भारते सर्वत्र विविधता अस्ति। यथा - अत्र जनानां विविधा: सम्प्रदाया:, विविधा: भाषा, विविधा: वेषभूषा: च सन्ति। परम् अनेकतायाम् अपि एकताया: मधुरा धारा प्रवहति। अस्मिन् देशे सर्वे ऋतव: क्रमेण आगच्छन्ति। ते च वसन्त:, ग्रीष्म:, वर्षा, शरद्, हेमन्त:, शिशिर: च। अत्र सर्वे भाषा-भाषिण: एकं राष्ट्रध्वजं नमन्ति एकं च राष्ट्रगानं गायन्ति। राष्ट्रीय-उत्सवान् सामाजिक-उत्सवान् च मिलित्वा मानयन्ति। प्राय: जना: उत्सवेषु धार्मिक-कार्येषु च संस्कृतभाषायां कुर्वन्ति। यत: सर्व-संस्काराणां जननी संस्कृत-भाषा एव अस्ति।अत: कथ्यते-'भारतीया संस्कृति: संस्कृते एव निहिता अस्ति।'

**प्रश्ना:**

**I. एकपदेन उत्तरत—** 1 + 1 = 2

(i) भारते सर्वत्र का अस्ति ?

(ii) केषां जननी संस्कृत-भाषा अस्ति ?

**II. पूर्णवाक्येन उत्तरत—** 1 + 1 = 2

(i) भारते सर्वे भाषा-भाषिण: किं कुर्वन्ति ?

(ii) जना: केषु कार्येषु कस्यां भाषायां च मन्त्रोच्चारणं कुर्वन्ति ?

**III. निर्देशानुसारम् उत्तरत—** 1 + 1 + 1 + 1 = 4

(i) 'परम् अनेकतायाम् अपि एकताया: मधुरा धारा प्रवहति' अत्र 'मधुरा' इति कस्य विशेषणपदम् अस्ति ?

(अ) भाषाया: (ब) धाराया: (स) संस्कृतभाषाया: (द) एकताया:

(ii) 'अस्मिन् देशे सर्वे ऋतव: क्रमेण आगच्छन्ति।' अत्र 'आगच्छन्ति' इति क्रियापदस्य किं कर्तृपदम् अस्ति ?

(अ) अस्मिन् (ब) देशे (स) क्रमेण (द) ऋतव:

LearnCBSE.in

(iii) अनुच्छेदे 'समानता' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(अ) भाषा (ब) विविधता (स) निहिता (द) एकता

(iv) 'ते' इति पदं कस्मै आगतम् ?

(अ) भारताय (ब) संस्कृताय (स) एकतायै (द) ऋतुभ्य:

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्ड: (ख)

### रचनात्मकं कार्यम् (15 अङ्का:)

2. **भवान् वाराणस्यां स्थित: उमेश:। भवत: मित्रं नागेन्द्र: प्रयागे वसति। स: नवमकक्षायां प्रथमश्रेण्याम् उत्तीर्ण:। तं प्रति लिखितं वर्धापनपत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत।** ½+½+½+½+½+½+½+½+½+½ = 5

लक्ष्मीनारायण विद्यालय:

(i).......

तिथि: ............

प्रिय मित्र (ii).......

(iii).......।

अत्र कुशलम्। (iv).......। भवत: पत्रं पठित्वा ज्ञातं यत् भवान् (v)....... प्रथमं स्थानं प्राप्तवान्। इदं (vi)....... मम मनसि महान् सन्तोष: अभवत्। मम गृहस्य सर्वेषां (vii)....... पक्षत: भवते वर्धापनानि। मातृपितृचरणेषु (viii)....... प्रणामा:। अनुजाय च (ix).......।

भवत: मित्रम्

(x).......

**मञ्जूषा**

| |
|---|
| तत्रास्तु, सदस्यानाम्, उमेश:, ज्ञात्वा, नमस्ते, वाराणसीत:, परीक्षायाम्, मम, नागेन्द्र!, स्नेहराशि: |

3. **चित्रम् आधृत्य पञ्च वाक्यानि लिखत।** **2 + 2 + 2 + 2 + 2 = 10**



**मञ्जूषा**

| |
|---|
| विद्यालये, क्रीडादिवस:, बालानां, भवनम्, कन्दुकेन, वृक्षा:, पक्षी, आनन्देन, धावनम्, पारितोषिकोत्सव, परस्परम् |

**अथवा**

**'वर्षा ऋतु:' इति विषयम् अधिकृत्य प वाक्यानि संस्कृतेन लिखत। सहायतार्थं पदानि मञ्जूषायां दत्तानि सन्ति।**
**2 + 2 + 2 + 2 + 2 = 10**

**मञ्जूषा**

| |
|---|
| मेघा:, जलम्, सर्वत्र, ध्वनि:, कृषका:, शीतल:, वायु:, हरीतिमा, जना:, वहति, वर्षति, वपन्ति, गर्जन्ति, बीजानि, दृश्यते |

## खण्डः (ग)

### अनुप्रयुक्त-व्याकरणम् (30 अङ्काः)

**4. (अ) अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत।** 1 + 1 = 2

(i) 'ष्' वर्णस्य किम् उच्चारणस्थानम् अस्ति?

(ii) 'भवति' अत्र ओष्ठ्यः वर्णः अस्ति?

**(आ) रिक्तस्थानं पूरयत—** 1 + 1 = 2

(iii) अष्टाध्यायी = अ + ष् + ट् + आ + .... + य् + आ + य् + ई

(iv) उ + ज् + ज् + व् + अ + ल् + आ = .........

**5. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत।** 1 + 1 + 1 + 1 + 1 = 5

(i) जनाः <u>देवालयम्</u> गच्छन्ति।

(अ) दे + वालयम् (ब) देव + आलयम् (स) देवा + लयम् (द) देव् + आलयम्

(ii) भिक्षुकः <u>प्रत्येकं</u> गृहं भ्रमति।

(अ) प्रत्य + एकम् (ब) प्रति + एकम् (स) प्रत्ये + कम् (द) प्रतिः + एकम्

(iii) <u>वाक् + दानम्</u> केन क्रियते?

(अ) वाक्दानम् (ब) वाग्दाङ्नम् (स) वाङ्दानम् (द) वाग्दानम्

(iv) <u>भवच्चरणयोः</u> मम प्रणामः।

(अ) भवत् + चरणयोः (ब) भवच्च + रणयोः (स) भवच्चरण + योः (द) भव + चरणयोः

(v) <u>तदैव</u> रमा अवदत्।

(अ) तद + एव (ब) तदा + एव (स) तत् + देव (द) तदै + एव

**6. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत।** 1 + 1 + 1 + 1 + 1 = 5

(i) ............. आज्ञा पालनीया भवति।

(अ) गुरुम् (ब) गुरुणा (स) गुरवे (द) गुरूणाम्

(ii) नरः ............. विना न शोभते।

(अ) विद्या (ब) विद्याम् (स) विद्यायै (द) विद्यायाः

(iii) ............. जन्मदिवसः कदा अस्ति?

(अ) त्वम् (ब) त्वया (स) तव (द) त्वाम्

(iv) देवदत्तः ............. उपेत्य संस्कृतम् अपठत्।

(अ) शिक्षकः (ब) शिक्षकम् (स) शिक्षकाय (द) शिक्षकस्य

(v) यूयम् ............. फलानि खादत।

(अ) इदम् (ब) इमे (स) इमानि (द) अनेन

**7. अधोलिखितेभ्यः विकल्पेभ्यः धातोः उचितं रूपं चित्वा रिक्तस्थानं पूरयत—** 1 + 1 + 1 + 1 + 1 = 5

(i) भवान् शीघ्रम् उन्नतिं .............।

(अ) करिष्यसि (ब) करिष्यति (स) करिष्यतः (द) करिष्यन्ति

(ii) छात्राः प्रतिदिनं गुरून् पुस्तकानि .............।

(अ) याचन्ते (ब) याचते (स) याचसे (द) याचध्वे

(iii) सर्वे देशभक्ताः .............।

(अ) मोदते (ब) मोदेते (स) मोदन्ते (द) मोदसे

(iv) गुरुः शिष्यान् प्रश्नम् .............।

(अ) अपृच्छन् (ब) अपृच्छम् (स) अपृच्छताम् (द) अपृच्छत्

(v) ते सर्वे अद्य भोजनं .............।

(अ) पचतु (ब) पचन्तु (स) पचताम् (द) पच

LearnCBSE.in

8. **प्रदत्तानां शब्दानाम् उचितेन रूपेण वाक्यानि पूरयत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) एकदा सीता ......... सह पम्पासरोवरं प्रति अगच्छत्। (रामम्)

(ii) तत्र तौ अपश्यताम् यत् ......... परितः हरिताः फलान्विताः वृक्षाः सन्ति। (सरोवरम्)

(iii) तौ ......... अधः विश्रामं कृत्वा आश्रमम् आगतवन्तौ। (वृक्षम्)

(iv) आश्रमे लक्ष्मणः ......... नमः इति वदन् उदतिष्ठत्। (सीतारामात्)

(v) लक्ष्मणः ......... बहिः स्थितवान्। (आश्रमः)

9. **रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य, विभज्य वा उत्तरं लिखत।** **1 + 1 + 1 + 1 + 1 + 1 = 6**

(i) अहम् प्रधानमन्त्रिणः भाषणं श्रु+तुमुन् रक्तदुर्गं गच्छामि।

(ii) मनीषः आलस्यं त्यज् + क्त्वा अध्ययनं करोति।

(iii) मातापितरौ प्रणम्य पुत्रः विदेशं गच्छति।

(iv) छात्रः विद्यालयं गत्वा गुरुम् प्रणमति।

(v) त्वं गृहम् आ + गम् + ल्यप् पठसि।

(vi) त्वम् पत्रं लिख् + तुमुन् गच्छ।

## खण्डः (घ)

### पठित-अवबोधनम् (35 अङ्काः)

10. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

कश्चन माधवो नाम विप्रः चिरकालपालितं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य श्राद्धार्थं गतः। ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः। सः तं व्यापाद्य खण्डशः कृतवान्। अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत्तः। ब्राह्मणं दृष्ट्वा नकुलः रक्तविलिप्तमुखपादः तस्य चरणयोः अलुठत्। विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति, तावद् बालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति। ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत्।

**प्रश्नाः**

I. **एकपदेन उत्तरत—** ½ + ½ = 1

(i) कः सर्पं व्यापाद्य खण्डशः कृतवान्?

(ii) ब्राह्मणः आत्मानं किं मन्यमानः परं विषादम् अगच्छत्? **(मूल्यपरकः प्रश्नः)**

II. **पूर्णवाक्येन उत्तरत—** 2

ब्राह्मणं दृष्ट्वा नकुलः किमकरोत्?

III. **निर्देशानुसारम् उत्तरत—** 1 + 1 = 2

(i) 'पुत्रनिर्विशेषं' इति पदं कस्य विशेषणपदम् अस्ति?

(अ) नकुलस्य (ब) ब्राह्मणस्य (स) माधवस्य (द) राज्ञः

(ii) 'समीपं गत्वा' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(अ) उपगत्य (ब) अपत्यं (स) गृहीत्वा (द) उपसृत्य

11. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** 5

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।**

**प्रश्नाः**

I. **एकपदेन उत्तरत—** ½ + ½ = 1

(i) अविवेकः केषां पदम्?

(ii) सहसा किं न विदधीत?

II. **पूर्णवाक्येन उत्तरत—** 2

गुणलब्धाः सम्पदः कं वृणते?

LearnCBSE.in

III. निर्देशानुसारम् उत्तरत— 1 + 1 = 2

(i) 'विवेक:' इत्यस्य विपर्यय: प्रयुक्तम्?

(अ) विमृश्य (ब) अविवेक: (स) वृणते (द) गुणा:

(ii) 'अकस्मात्' इत्यर्थे समानार्थी शब्द प्रयुक्तम्?

(अ) लुब्धा (ब) स्याम (स) सहसा (द) विदधीत

12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5

लक्ष्मण: एहि एहि! आयुष्मान् भव (सुमन्त्रं वीक्ष्य) तात! क: अत्रभवान्?

सुमन्त: कुमार! अयं भरत: कुमार:।

लक्ष्मण: एहि एहि इक्ष्वाकुकुमार। वत्स! स्वस्ति, आयुष्मान् भव।

भरत: अनुगृहीतोऽस्मि।

लक्ष्मण: कुमार! इह तिष्ठ! त्वदागमनम् आर्याय निवेदयामि।

भरत: आर्य! अचिरम् इदानीम् अभिवादयितुमिच्छामि। शीघ्रं निवेद्यताम्।

लक्ष्मण: बाढम्। (उपेत्य) जयतु आर्य:। आर्य:।

प्रश्ना:

I. एकपदेन उत्तरत— ½ + ½ = 1

(i) भरत: कम् अचिरम् अभिवादयितुम् इच्छति?

(ii) क: भरतम् कथयति "कुमार! इह तिष्ठ!"

II. पूर्णवाक्येन उत्तरत— 2

लक्ष्मण: सुमन्त्रं वीक्ष्य किम् अपृच्छत्?

III. निर्देशानुसारम् उत्तरत— 1 + 1 = 2

(i) दृष्ट्वा इति पदस्य किम् पर्यायपदम्?

(अ) उपेत्य (ब) वीक्ष्य (स) आगत्य (द) आर्याय

(ii) 'आर्याय निवेदयामि' अत्र 'आर्याय' पदम् कस्मै प्रयुक्तम्?

(अ) भरताय (ब) सुमन्त्राय (स) रामाय (द) सीतायै

13. अधोलिखितपंक्त्यो: उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत। 1 + 1 + 1 + 1 = 4

**(i) स जातो येन जातेन याति वंश: समुन्नतिम् स एव जात:।**

(1) यस्य जन्ममात्रेण वंश: समुन्नतिं याति।

(2) यस्य जन्मन: पश्चात् वंश: समुन्नतिं याति।

(3) यस्य गुणै: कर्मभि: च वंश: सर्वविधाम् उन्नतिं करोति।

**(ii) हर्षास्रमासारमिवोत्सृजन्ती।**

(1) हर्षस्य अश्रूणि अस्रम् इव मु न्ती।

(2) सारभूतानि अश्रूणि मु न्ती।

(3) हर्षस्य अश्रूणि वृष्टिवत् मु न्ती।

**(iii) न दुष्टयानानि आरोहेत्।**

(1) न दुष्टै: सह वाहनानि आरोहेत्।

(2) विकृतानि वाहनानि न आरोहेत्।

(3) दूषितानि स्थानानि न गच्छेत्।

**(iv) सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।**

(1) सज्जनै: क्रीडया एव शिलाखण्डेषु अक्षराणि लिख्यन्ते।

(2) सज्जना: प्रभुलीलया एव अक्षराणि पाषाणखण्डेषु लिखन्ति।

(3) सज्जना: यत् किञ्चित् सामान्येन अपि कथयन्ति तत् पाषाणे लिखितम् इव भवति।

LearnCBSE.in

**14. अधोलिखितस्य पद्यांशद्वयस्य अन्वययोः मञ्जूषायाः सहायतया रिक्त स्थानानि पूरयित्वा पुनः लिखत। ½ + ½ + ½ + ½ + =2**

**(क) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।**
**मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।।**

**अन्वयः**—पृथिव्याम् ___(i)___ रत्नानि जलम्, अन्नं ___(ii)___ (च सन्ति)। ___(iii)___ पाषाढ्खण्डेषु रत्नसंज्ञा ___(iv)___ ।

**(ख) गौरवं प्राप्यते दानात् न तु वित्तस्य संचयात्।**
**स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः।** ½+½+½+½ = 2

**अन्वयः**—दानात् गौरवं ___(i)___ वित्तस्य ___(ii)___ तु न। (यथा) ___(iii)___ स्थितिः उच्चैः पयोधीनाम् स्थितिः ___(iv)___ (भवति)।

**मञ्जूषा**

| प्राप्यते, सुभाषितम्, मूढैः, अधः, सञ्चयात्, त्रीणि, पयोदानां, विधीयते। |
|---|

**15. वाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत— 1 + 1 + 1 + 1 = 4**

(1) शीलं परं भूषणम्।
(2) मनः न अनुभ्रामयेत्।
(3) श्वेतकेतुः बीजे किमपि न पश्यति।
(4) वयं वल्कलैः परितुष्टाः।

**16. घटनाक्रमानुसारं वाक्यानि पुनः लिखत— ½+½+½+½ +½+½+½+½ = 4**

(i) ब्राह्मणः श्राद्धार्थं राज्ञा निमन्त्रितः भवति।
(ii) ब्राह्मणः सुस्थं पुत्रं दृष्ट्वा विषादमनुभवति।
(iii) ब्राह्मणः नकुलं बालरक्षार्थं व्यवस्थापयति।
(iv) ब्राह्मणः श्राद्धं गृहीत्वा प्रत्यागच्छति।
(v) ब्राह्मणः श्राद्धार्थं राज्ञः प्रासादं गच्छति।
(vi) उज्जयिन्यां माधवो नाम विप्रः वसति।
(vii) नकुलस्य मुखं रक्तविलिप्तं दृष्ट्वा ब्राह्मणः नकुलं मारयति।
(viii) नकुलः बालकस्य समीपम् आगच्छन्तं सर्पं मारयति।

**17. (अ) अधोलिखितवाक्येषु रेखांकितपदानां कृते उचितम् अर्थं चित्वा लिखत— 1 + 1 = 2**

(i) पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि।
(अ) नकुलतुल्यम् (ब) पुत्रतुल्यम् (स) बालतुल्यम् (द) रक्षकतुल्यम्

(ii) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।
(अ) सज्जनैः (ब) मूर्खैः (स) विद्वद्भिः (द) पाषाणैः

**(आ) अधोलिखितेषु अर्थमेलनं कुरुत— ½ + ½ + ½ + ½ = 2**

| | |
|---|---|
| (i) सद्भिः | रात्री |
| (ii) नक्तम् | आगच्छ |
| (iii) एहि | नेत्रम् |
| (iv) लोचनम् | सज्जनैः |

LearnCBSE.in